# ॥ रङ्गनाथ गद्यम् ॥

स्वाधीन-त्रिविध-चेतनाचेतन-स्वरूप-स्थिति-प्रवृत्ति-भेदम्'
क्लेश-कर्माद्यशेष-दोषासंस्पृष्टं' स्वाभाविकानवधिकातिशय-
ज्ञान'-बलैश्वर्य'-वीर्य'-शक्ति-तेजः सौशील्य'-वात्सल्य-
मार्दवार्जव'-सौहार्द'-साम्य'-कारुण्य-माधुर्य-गाम्भीर्यौदार्य'-
चातुर्य'-स्थैर्य'-धैर्य'-शौर्य-पराक्रम'-सत्यकाम'-सत्यसङ्कल्प'-
कृतित्व'-कृतज्ञताद्यसङ्ख्येय-कल्याण-गुणगणौघ-महार्णवम्'
परब्रह्मभूतं' पुरुषोत्तमं' श्रीरङ्गशायिनम्' अस्मत्स्वामिनं' प्रबुद्ध'
नित्य-नियाम्य' नित्य-दास्यैकरसात्मस्वभावोऽहम्' तदेकानुभवः' तदेकप्रियः'
परिपूर्णं भगवन्तं' विशदतमानुभवेन निरन्तरमनुभूय'
तदनुभव-जनितानवधिकातिशय-प्रीतिकारिता-ऽशेषावस्थोचित-
अशेषशेषतैकरतिरूप' नित्य-किङ्करो भवानि ॥ १ ॥

स्वात्म-नित्य-नियाम्य'-नित्यदास्यैकरसात्म-स्वभावानुसन्धान-पूर्वक'
भगवदनवधिकातिशय-स्वाम्याद्यखिल-गुणगणानुभवजनित-
अनवधिकातिशय-प्रीतिकारिता-ऽशेषावस्थोचिता-ऽशेषशेषतैकरतिरूप'-
नित्य-कैङ्कर्य-प्राप्त्युपाय-भूतभक्ति'
तदुपाय-सम्यग्ज्ञान' तदुपाय-समीचीनक्रिया' तदनुगुण-सात्त्विकतास्तिक्यादि
समस्तात्म-गुणविहीनः' दुरुत्तरानन्त' तद्विपर्यय-ज्ञानक्रियानुगुण-अनादिपाप-
वासना-महार्णवान्तर्निमग्नः' तिलतैलवत्' दारुवह्निवत्'
दुर्विवेच-त्रिगुणक्षणक्षरण-स्वभावाचेतन-प्रकृति-व्याप्तिरूप'-दुरत्यय'-
भगवन्माया-तिरोहित-स्वप्रकाशः'
अनाद्यविद्या-सञ्चिता-ऽनन्ता-ऽशक्य-विस्रंसन'-कर्मपाश-प्रग्रथितः'

अनागता-ऽनन्तकाल-समीक्षयाऽपि' अदृष्ट-सन्तारोपायः'
निखिल-जन्तु-जात-शरण्य! श्रीमन्! नारायण! तव चरणारविन्दयुगलं
शरणमहं प्रपद्ये॥ २ ॥

एवमवस्थितस्याऽपि' अर्थित्वमात्रेण' परमकारुणिको भगवान्'
स्वानुभव-प्रीत्या' उपनीतैकान्तिका-ऽत्यन्तिक-
नित्य-कैङ्कर्यैकरतिरूप-नित्य-दास्यं' दास्यतीति'
विश्वासपूर्वकं भगवन्तं नित्य-किङ्करतां प्रार्थये॥ ३ ॥

तवानुभूति-सम्भूत-प्रीतिकारित-दासताम्।
देहि मे कृपया नाथ! न जाने गतिमन्यथा॥ ४ ॥

सर्वावस्थोचिता-ऽशेषशेषतैकरतिस्तव।
भवेयं पुण्डरीकाक्ष! त्वमेवैवं कुरुष्व माम्॥ ५ ॥

एवम्भूत-तत्त्वयाथात्म्यावबोध-तदिच्छारहितस्याऽपि'
एतदुच्चारण-मात्रावलम्बनेन उच्यमानार्थ-परमार्थ-निष्ठम्'
मे मनः त्वमेव अद्यैव कारय॥ ६ ॥

अपार-करुणाम्बुधे! अनालोचित-विशेषाशेष-लोक-शरण्य! प्रणतार्तिहर!
आश्रित-वात्सल्यैक-महोदधे! अनवरत-विदित-निखिल-भूत-जात-याथात्म्य!
सत्यकाम! सत्यसङ्कल्प! आपत्सख! काकुत्स्थ! श्रीमन्! नारायण! पुरुषोत्तम!
श्रीरङ्गनाथ! मम नाथ! नमोऽस्तु ते॥

॥ इति श्रीमद्रामानुजविरचितं श्री-रङ्गनाथ-गद्यं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ranganatha_Gadyam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits